तेसतीति कश्चित् । पक्षे । दूरीकृतशत्रुरक्षः सेन्यानां पतिद्रोणः भीमेन तत्समसंगदायुद्धेन शल्यस्य निर्जि
तत्वात् अश्वत्थाम्ना तत्र युयुत्सुः स्वर्पतेरिन्द्रस्यात्मजेन जिष्णुना मुकुटापनयनिमित्तीवयुधिष्ठिरनिग्रहेच्छाभंगे क्व
तेसति निवेशं गतः । निवेशः शिबिरमित्यमरः ॥७॥ रचितान्तरदेवजन्मनारामेणार्जुनेन चमनोरथसे
वमुकुटस्य · मुकुटस्येव द्रोणप्रतिश्रुतयुधिष्ठिरनिग्रहेच्छारूपस्य मनोरथस्य च भंगं चिंतयतः धृतेति · धृ
तराज्यभारस्तुतसंपन्नस्य रावणस्य धार्त्तराष्ट्रस्य सुयोधनस्य चा ॥८॥ श्रागा । राजा रावणः सुयोधनश्च · नि
जानुजस्य कुंभकर्णस्य दुःशासनादेश्च · उद्बोधनं प्रायनादुत्थापनं प्रोत्साहनं च विजयानुबंधि निद्रित्वरं त्र
र्जुनाभियुक्तं चः संसप्तकास्तु समयात्संग्रामादनिवर्त्तिनः इत्यमरः ॥९॥ प्रातः । महदुत्साहेद्रवः · हं मागो
रुतानुकारी वाघविशेषः ॥१०॥ नरकलुवं · यातनाभूतिरूपं · वाहिनीनामयेन रकतुवं नरकात्मक ष

58 नराद्द्रवतीति नरकभूः रामस्तं प्रतियातुकाममिति कश्चित्। एतत्पदस्य रामपरत्वाग्रहे नरकासुरोत्पादकं राम
रूपं विष्णुमिति व्याख्येयं विष्णुना हि वराहरूपेण धरण्यां भौमो भगदत्तपितोत्पादितः यद्भुति त्रिजगत्यल्लवो
षितं रक्षसांपतिः पौलस्त्यः सोदरं कुंभकर्णं भ्रातः संग्रामाय प्रजिघाय। यक्षे· नरकासुरस्य भौमस्य सुतं·
यद्भुति· भ्रातर्वीर्यादि महाराजभोगसंपन्नं० अमररिपूणां दैत्यानां सोदरं भगदत्तं पतिर्दैत्योधनः ॥११॥ सप्र
। स कुंभकर्णो भगदत्तश्च ·वीरयानं तु यस्यानं वृत्तेभाविनि वारणो इत्यमरः· परेणामीयप्रविविरस्य प्रांशुताका
येन स्वशरीरेणाहस्तिना वत्रा छादितैकदिङ्मुखः। महामुखः पुष्करिदीर्घिकायावितिह लायुधः ॥१२॥ तं
सु। सुप्रतीकनाम्ना ईशानदिग्गजेन समानं· तत्संज्ञकेन स्वगजेन सह च संग्रामांगनमागच्छंतं किरीटेति त्रि
त्सुत्वं तं कुंभकर्णो भगदत्तेच युधि वानरद्राः नरेंद्रा वा राजानो वीति च· द्रुमेनशंकुः वर्के पुनर्योद्धुं। समीकं सं
पराये कमित्यमरः। सुप्रतीकः शोभनांगे भवे ईशानदिग्गज इति विश्वः ॥१३॥ सन्ना कृत सन्नाहहस्ति। राम०

स्थिते हेलावाहिनाये शरखास्तन्निनदरभीतभुवनेबलेस्मति · लभगदत्ताध्मातशंखत्रस्तभुववैनेवलेसंनद्धेस
तीतीच · नाम्यद्विगाजयाकुंभकर्णसेनया · ग्लायद्विकरिकुंभयाराधेयसेनयाच · द्रोणः काकोभारद्वाज
श्च · पतत्त्रीपक्षीवाशाश्च । द्रोणः काकोऽपि कपीपत्ताविति विश्वः ।१४। हेलातेनकुंभकर्णेन · करोव्यालसोत्पादि
यथास्यात्तथास्कुर्गमितिं वृटितन्नारेराधोगमितिं वादकारीश्वरणसंचारोकुवेनारामस्यसेनाकरिणाकमलि
नीवच्चूर्णिताचक्रोपक्षे · तेनकुंभितनाभगदत्तगजेनयुधिष्ठिरसेनाक्लिनी वक्षुस्मातेने ।१५। करः पाणि
ः शुंडाच · करवालः खड्गः । शातंतीक्ष्णंदंताग्रमेवकुंतोयस्यतं · शातकुंताग्रदंतमिति च पाठः गर्जोध्वनिः ए
नंकुंभकर्णभगदत्तगजंच · महोरेतसिकस्तूयांगर्जी वेहहबेभद्रानयो शिति येहिनी ।१६। पादः पुष्करः खड्ग
ः शुंडाग्रंचानीरेकरिकराग्रेचव्योम्नि खड्गे फले ऽ दुंजे · जेता तीर्थौषधिप्रभेदे चरूपवक्रेच पुष्करमिति वि
श्वः । हस्तोभुजः शुंडादंडश्च । भ्रामंभ्रामंभ्रांत्वाभ्रांत्वाप्रधनंयुद्धंश्चसोकुंभकर्णोभगदत्तगजश्च ।१७॥

59 न्नमा गजो वानरभेदः करी च हरयो वानरा अश्वाश्च · संहतं नाम मनं रथस्य · तदरिसैन्यं करिभिन्नमज्ज वृंदमिव
तेन कुंजरेण भिन्नमरिसैन्यमब्जवृंदमिवेति चाश्चर्यं युधिष्ठिरेण १८। सुग्रीवः। वानरेशः शोभनग्रीवश्च भीमो
लयंकरः पांडवस्य विषमदर्शनं निग्रहे प्राणसंशयं च तस्मात्कुंभकर्णात्करिणश्च कथमपि तत्कर्णाद्रि छेद
नेन लाघवेन च ।१९। स को कुंभकर्णो भगदत्तश्च · मारुतिना हनूमता भीमेन च · प्राक्पुरा उग्रो भयान
कः शिवः ज्योतिषाऽग्निना त्रिपुरमिवः प्राग्ज्योतिषेशो भगदत्त उग्रो रुद्रस्त्रिपुरमिवेति च ।२०। संसक्तं कुंभ
कर्णमभिलक्ष्मीकृत्य रामस्तरसा वेगेन आयातः आजगाम · प्रसर्पद्भिः तपः प्रवृद्धं तयः। संसप्तकानां रणो
रणादनिवर्तिनां · पक्षे · संसप्तकाः सुशर्मप्रभृतयः प्रसर्पत्प्रसेनां द्रष्टुं विजयोऽर्जुनः तं भगदत्तं · वलेना
भिरामः सुंदरः ।२१। अथ ॥ सुररिपुः कुंभकर्णो भगदत्तो राजपुत्रौ रामार्जुनौ ॥२२॥ अन्वयः। अनेन कुंभ
कर्णेन भगदत्तेन च वैष्णवमस्त्रमिव रौद्रं शूलं · रौद्रं शूलमिव वैष्णवमस्त्रं च · महत्प्रीतिकरो हरिर्वा युयु राम०

द्रोहनूमानन्यथ हत्वा तत्र भंजनं द्रुं जनन हृपात स्मसाय शोमयी मालिवाभूत्। देवानंदनः कृशो तत्राह तं हेद्य
वमस्य यशोमयी वैजयंत्यभूत्। इति च अत्र प्रथमं संकोपितः ततो चांतरे २ सुग्रीवः ३ संसप्तकानां ४ अथ
सुरारी ५ एतस्याथीति पावकमो रामायणाद्द्रष्टव्य एव तु क्त इति कश्चिक्षद युक्तं अत्रांतरे इत्येतस्म संसप्तकेत्यतः
प्राग्व्यवहितपाठे भारतनम क्षेऽसंगत्यापत्तेः हरेर्वैस्त वा अग्रग्रही तु स्तदा तन्त्राभावात्। अन्तव्येकथानिर्बधांते
स्मत्कृतमेव समाधानं द्रष्टव्यः पावकमादौ यिस्म वलीयस्त्वं कयस्या प्रधानत्वेनाविवक्षा चेति। २३। तस्यार
मस्यार्जुनस्य च। रामा। रिपुकुंजेरो वैरिश्रेष्ठः कुंभकर्णो यरि नरसिंहस्य पुरुषश्रेष्ठस्य। उपमितं व्याघ्रादि
भिरिति समासः शिलीमुखा एव नखाः करी च। रूपकालंकारः। स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः। सिं
हशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचरा इत्यमरः। २४। त्वं च। लोकपाला इंद्रादय। उभयोः रामकुंभकर्ण
योरर्जुनभगदत्तयोश्च। प्रतिभयं भयंकरं। युगांतं प्रलयं। २५। विधा। नरवीरे रा। रामे रा। र्जुनेन च। च

60 तुरंगस्य सैन्यस्य पूर्वमेव चतुरंगभंगं कृत्वा मत्तो दृप्त इति च सिंहेन मत्तहस्ती तस्येव मोलो शिलीमुखेन तज्ज
न्ये नखेन केसरिणा करीव मोलो बाणेन जघ्ने इति चार्थः समं विरोधि विपर्यः कुंभकर्णः विरोधिनो भगद
त्तस्य वैरिणः सुप्रतीकस्य गजि। तत्प्रशीलेन रामेण विपक्षवीरः कुंभकर्णः पुरस्तात्स्वर इव पक्षे पुरा
रामेण कुंभकर्ण इव खरस्ती ब्रो भगदत्तो जिष्णुनार्जुनेन।२७। नरा नरवरो रामोर्जुनश्च। तस्य कुंभकर्ण
स्य भगदत्तस्य च शिरः।२८। कंठान्तस्य कुंभकर्णस्य भगदत्तस्य च कायः गौरवेणा दुर्वह तया गुरुरिति बु
ध्वाच भूमिर्हि भगदत्ते नस्य प्रसूः।२९। तस्या कुंभकर्णस्य भगदत्तस्य च धात्र्या उपमानां त्राज्ञध्याच।
धात्रेति वीजनन्याश्चिमलकीवसुमत्युपमातृक्षित्यमरः।३०। सदेवः सरामोर्जुनश्च देवतेवीरेस्य दे
वता सहितेनेवीरेरिति व्याख्यानेन रुद्रेव च यो रामोर्जुनश्च वैरीकुलकर्णो भगाढुत्तस्य सूर्यकरण राम०
विशेषं कामदेवः काव्यप्रयोजनकः शंबरमिति पाठे कंदर्पपक्षे दैत्यविशेषं राजपक्षे तन्नामानं ३१॥

आवश्यकपरिलेपव्याचिख्यासा व शास्मनः। लक्ष्मणस्य कृतो सर्गो नवमः समपद्यत॥ ॥ततो। विपक्ष
नायः रावणो दुर्योधनश्च। स्वपक्षः कुंभकर्णो भीमगदन्तादिश्च १। तेरा। राहो रावणाः स्वराघूध त्रैर्धृत
राष्ट्रसंतस्य चाकुरमारादेवांतकादयो द्रौः शासनादयश्च। २। घंटा। घंटायाष्टंकारेण घोरउत्कटोड्डम
रवोघविशेषसंहूती। गजसंहतिः घाटीलिः समूहेः दोर्दोषा च भुजा भुज इति शब्दभेदः उद्भूणी उप
ताः। ३। आमू। मूलादारभ्य। रणांगनपर्यंतं। आचार्येण तत्कमौधितिकृतेन। द्रोणेन च। पद्मं संख्याविशेषं
पद्ममिव पद्मं चक्रव्यूहं च। पद्मोस्त्री पद्मकेव्यूहे निधिसंख्यांतरेंबुज इति मेदिनी। ४। ततो। नानायुधैर्वृक्षा
दिभिः खड्गादिभिश्च। भीममुखाः भीषणास्य वृकोदरपुरोगाश्च। परस्य रावणस्य सुयोधनस्य च। प नाना
।यानातिगमनातिरयाश्च। गुरुरोगरिष्ठा निगुरो द्रोणस्य च। नदृश्रिद्रिः पौलस्त्यपुत्रैः रक्षमा
णसेनासन्निवेशं। शाहयमानालायुधराक्षसंदुःशासनादिरक्षितस्कंधं च। पद्येति। अन्वजपरागैः

61 पिंजरं सरोरुहस्तिभिरिवहन् मदाद्रिभिर्वैरिणांबलमावृतं॰ पक्षे॰ यमो चक्रव्यूहधूलीधूसरं कौरवबलं गतैः स
रद्रुवभीमाद्रिभिरावव्रे। ६। महीमहत्वात्कीर्त्तेः कल्पांतपर्यंतं भूषणं। ७। द्विषां। सुशर्मप्रोमनसुरवंतरय
नायकः गोपालोभूपो रामः प्रणादीवारकः देवांतको रावणपुत्रः हरेर्वालिनः कुमारमंगदं॰ विपक्षाणां
कं पार्थं भयजननायन्नारोत्सीत्॰ पक्षे॰ द्विषांस्त्रपाकत्तो॰ सुशर्मो त्रिगर्त्तः युधिष्ठिरसैन्यनिवारकः। ९। दीव्यं
तीतिदेवाविजिगीषवस्तेषां दैत्यवंशप्रत्वादमेराणांवाक्रांतकारकद्वसंत्रासकः। हरेः कुमारमैद्रिं पार्थं त्वर्जु
नं विगतः पक्षः सहायवर्गो यस्यतमेकाकिनं। ८। समा। वैरिवृंदस्मे देहक्षात्त्रपिवीराः देवांतकादिसमूहमे
तं नाशक्नुवन्। चंद्रकराः पद्मामिवः पक्षे शत्रुसमूहमेनारोपियप्रोपमं चक्रव्यूहं। ९। समुसमुद्वैतेः सं
दृतैर्गमनैः समुद्रतुल्यं॰ सिंधुरैर्गजैरत्रतिगच्छतीतिवा। सिंधुराजो जयद्रथश्च। सपत्नाकरणाय सपुरवशा रा॰न॰
रमवेशेनसपत्रंकर्त्तुं॰ सपत्ननिष्पन्नादतिव्ययन इति डाच॰ राजासुग्रीवो युधिष्ठिरश्च॰ पुरुहूतपौत्रं त्वंगद

मलिमन्युंच॰ चक्रंद्विषामित्यपिपाठः।१०। ससं।सोंगदो ऽभिमन्युश्च॰ पितुःसोदरःसुग्रीवोयुधिष्ठिरश्च॰ रथेनेवम
नोरथेनमत्तोरथेनेवरथेनच। स्कंधः सेनासन्निवेशाः।११। सचा।वारोवैश्रीरुद्रैः शरैरसनैश्चवृक्षविशेषैःस्फु
रतःकराग्रस्यरंहसावेगेनश्चयतःकृतयागंपिक्षेसोऽभिमन्युःसशरवेणुमयोञ्चचापस्फुरत्कराग्रस्यरंहसा।१२
।तमा।तंत्रंगदंञ्चभिमन्युंचा।चक्रंसमूहोव्यूहविशेषश्च॰ समुद्रतिरुद्धाःकपयोहनूमंतमिवजयद्रथनिरुद्धा
मीमादयःसिंधुनिरुद्धगानरामारुतिमिवेतिच।१३।परि नांगदेनाभिमन्युनाच।१४।सिंहमार्तां।गजेंद्रिशैल
वत्यद्रव॰ वेद्दंतउच्छूलंतः।शारादयोनक्रादृव।१४।विरो।श्चपोढानित्यक्तानिलक्ष्मणानि॰ वीरा।एतंत्रंगदमभिम
न्युंच॰ रणावेगस्वनिघ्नमधीनं।श्चधीनोनिघ्नश्चायत्तइत्यमरः॰ चिह्नानियेनतंनिरस्तदुर्योधनपुत्रंच।शतान्य
रेपरश्शताः।परश्शताद्यास्तेयेषांपरासंख्याशतादिकादित्यमरः।१७।वीरातंत्रंगदंञ्चभिमन्युंचबृहद्
लंमहत्सैन्यं॰ बृहद्दलःकौसल्यश्च॰ दुर्धर्षश्चासोनरांतकोरावणपुत्रःद्विषतांनराणामंतकश्च॰ तंत्रंगदंञ्च

62

भिमन्युत्वाद्दुःखेन शास्यत इति दुःशासनो रावणो दुर्योधनानुजश्च ॥१८॥ पक्षे ॥ निधानं निधिः । अवस्थापनं [illegible]
तयोरंगदनरांतकयोरभिमन्युद्रोण्योः समरोस्य ॥१९॥ मिथः । अंगदः स्वस्थो निश्चिंतः नरांतकस्तु स्वर्गस्थो मृतः । प
क्षे अभिमन्युः स्वर्गस्थः द्रोणस्तु समनि निर्नि । अंतः ॥२०॥ तदा असौ दशाननो राजा भद्रं कुमारं नरांतकं । पक्षे दशाशो
कावस्थाश्रान्तेनेयस्य दुःखदशायामननंजीवनं यस्येति वा असौ राजा युधिष्ठिरः सौभद्रं सुभद्रापुत्रमभिमन्यु
। नोस्माकं दशा तदवस्थानेति शुशोचेति वा ॥२१॥ विनी । अस्य नरांतकस्य पिता रावणोभिमन्योः पिताऽर्जुनश्च ॥२२॥
प्रधा । वृद्धस्य क्षत्रस्य दशरथस्यात्मजो रामः निजात्मजोन नरांतकः स रावणः । पक्षे वृद्धक्षत्रो जयद्रथपि
ता आत्मजोभिमन्युः सोर्जुनः ॥२३॥ औद्धा पश्चात्कृतस्तिरस्कृतः पृष्ठे स्थापितश्च सिंधुराजः समुद्रो जयद्रथ
श्च येन । नरेंद्रो रामो युधिष्ठिरश्च सेनासंग्रामांगनं प्राप रवेः प्रभा प्रातर्दैवमिव प्रातर्युद्धभूमिं प्रायेति च ॥२४॥
अथा । अतिकायो रावणात्मजो महाकायश्च जयद्रथो जैत्रस्यंदनः सिंधुराजश्च विजयेच्छुरं धनुर्विधुन्वन् विज्ञ राम०

योर्जुनः स्थिरं धनुरितिच। खर्परे शरि वा विसर्गलोपः सः रामावरजो लक्ष्मणः रामावरजेन कृस्नेन सहितश्चा
।२५। गुरुः। गरिष्ठेन कृतकवचेन स्मपादपूरणे युद्धशीलेन सुतरां दक्षिणा च पुरस्तादुपस्थितेन येन केनापि
राक्षसवीरेण सह युध्वा स लक्ष्मणः परसैन्यमध्यं प्रविवेश। पक्षे अस्मयो गर्वरहितः सन् द्रोणेन ततः कृतवर्म
णा हार्दिक्येन ततः अधिकेन प्रतिपक्षेण तिपक्षेण सुदक्षिणा नाम्ना कांबोजेन लूयः अन्यं तं तं दंतपर्येव
स्मायियध्यास्या तथा युध्वा सोर्जुनः कौरवसेना रूपस्य घोरस्य प्राकटपाश्चात्य सूचिगर्भपद्मव्यूहादुरवगा
हस्य महार्णवस्य मध्यं व्यलोडयत्।२६। अकः। क्रियाविशेषणं। तेन लक्ष्मणेन जिष्णुना च।२७। विंदः। प्रथ
म उपस्थितो विंदः पश्चादुपस्थितो नुविंदः तावदृश्यः प्रतिवीरस्य भेत्ता कृतरणा निवर्त्तिवधः सुदर्शनानां पुरो
दृश्यमानवीराणां उद्योग प्रतिघातकः स लक्ष्मणो दुर्योधिनस्य दुष्ठ रवयोधनीयस्य रावणाबलस्य तादृशात
घोषैर्धानां वामानस्य दर्पस्य गोरवस्य वा भंगं चकार। पक्षे विंदानुविंदावावंत्यौ तयोः प्रतिवीरयोर्हंता सं स

63 न्नकास्तु समयात्संग्रामाद्‌ निवर्तित इत्युक्त्वा नीसुशर्मोदियोधानां कृतघातः सुदर्शनस्य वीरविशेषस्य उद्घोगर्ह
ता सोऽर्जुनः दुर्योधनस्य द्रोणाब्धदुर्मं चक्रव्यूहस्य पराजयेनापमानं चकार ।२८। तिरोहरयो वानराः तस्य ल
क्ष्मणस्य शूरैर्विपक्षैः सर्वस्मिन्नः वार्यमाणैः सति । अममपसीय यो हनुमद्घाता वेगेनास्य लक्ष्मणस्य हर्षं च
कुर्वन् पक्षैः शरगृहं कृत्वा सूर्यरश्मीनामपि प्रवेशं निरुंधतोऽर्जुनस्य बाणौर्विरोधिपक्षे वार्यमाणे कृस्नेन मुक्ताः
पायिनार्जुनोत्पादितनिपानजलाः समाश्वस्ताः सोत्साहपादविक्षेपारथ्याश्च स्यार्जुनस्य यथापूर्वं वेगेन
हर्षं चक्रुः ।२९। यथा । वीराणां दृहुषेब मंनाम वरुणात्मजं वानरं श्रुतायुधः प्रसिद्धगदाप्रहरणो मन्त्रोमहा
श्वो रावणानुजः यथा गदया जघान तेनतयेव गदया स निहतः । अत्र रामायणो युद्धोन्मत्तं च मत्तं च भ्रात
रौ कपिरावणाः । महापार्श्वो महासत्वं भ्रातरं च महोदरमिस्युन्तरार्द्धोक्तो मत्तयुद्धोन्मत्तावेव नतु तद राम०
न्यौ अत्रांतरं निर्जमुनैर्नीतश्रेष्ठाः षडेते युद्धकांक्षिणः । त्रिशिराश्चातिकायश्च देवांतक नरांतकौ ।

महोदरमहापार्श्वौ निर्जग्मतुः कालचोदितौ इति पक्षे परिगणनात्तावन्तामेव युद्धवधयोर्दर्शितत्वात् महोदरवधा
नंतरं तस्मिंस्तु हते तस्य पदप्रयोगान्महापार्श्वे वैधाचस्य रेगदामादाय संक्रुद्धो मत्तो राक्षसपुंगव इत्युपक्र
मस्य स्वयागदया भग्नो विशीर्णो दशनेक्षणः। निपपात तदा मत्तो वज्राहत इव द्रुम इति तस्य मत्त इति च पदे
शेषश्च· एतत्स्वभट्टिकाव्यलुद्धिलसिते मत्तोन्मत्तयोरेव निर्दिष्टत्वात्स्पष्टं· एतेन महापार्श्वः श्रुतायुध इति पा
गे मत्त इति तु प्रामादिक इति वदन्तु रामायणाभिज्ञंमन्यः पामरः। पक्षे· श्रुतायुधो नाम वारुणिः पर्णाशा
नदीसुतः अयुध्यमानप्रहृतस्वघातिन्याविनदन्तगदया वीराणां श्रेष्ठे दुर्द्धर्षे क्रुद्धे प्रमत्तो जघान· सचत
येजघ्ने। ३०। अथ पवमानसुतोहमनुमान् सुज्ञते इति युयुधानो वरूथिनीनां सेनानां पतिर्नलिस्त्वश्व·वि
रोधिपक्षं क्षीणां चक्रतुः युद्धे ते रोगादिकष्टान चिवाहलकाद्वित्वे भयंकरः २ युयुधानः एतत्त्वद्युध्यतो माधवीय
धातुवृत्तौ स्पष्टं। पक्षे· भीमसेनसात्यकी· विपक्षं दुर्योधनं। ३१। एके। ताभ्यां हनुमन्नीलाभ्यां भीमसात्यकिभ्यां

च॰ एकेन हनूमता भीमेन च मया अंत्रेषि पादपक्षायेन तद्रहसाः मूलरक्षस्सु रावणार्द्दहोरूपतनसुत्रे देवांतकं हत्वा॰ अले
अस्यंतं भग्नमूलरक्षककर्णवेगेन च॰ अपरेणानीवेनसात्यकिना च॰ अयुतसंख्याकं युतं संहत्य स्फुटं च यैरिणां
रक्षसां कौरवाणां च। अंधकारोस्त्रियां ध्वांतमित्यमरः॥ बलध्वंसकृता विद्रावितसैन्येन॥ ३२। दधाजेतु मिका
या धैर्यं दधतसत्र्वांजनेयो हनूमान्दृष्किमैषद्वपरास्पराघातमवृद्धयुयुत्सो वीरः शूरः॥ तदीयखड्गदृढा
घातेन मूर्छितत्वात्कृतावमानोपि त्वस्य रपत्यसत्रिणी— बहुकर्णस्य विश्वरूपस्य वज्रीदं इद्रवषकृणस्य
त्रिशिरसो रावणात्मजस्य तदीयखड्गेन शिरोधिकं धाधरां चिच्छेद वृष्णिः शिवगणाः विलसद्दृष्किगणो रि
ति माघश्लेषादिति कश्चित्तन्न॰ अचिराज्जितमीनकेतनो विलसन्वृष्णिगणो नमस्कृतः। क्षितिपः क्षपितो
द्वतांधको हरलीलां सविडंबयिष्यतीति चेयघद्लोकोवृष्णिविलसन्वृषाकृढइत्यर्थः वृषो क्षिशा सुकृतेंद्रयो राम०
रिति विश्वः वेजयंत्योरिति सर्वक पादौ व्याख्यानात्॥ सत्यपि हृष्मगणोल्वतछोयैर्मानासावातामहत्वमेषयुद्धा

रामस्य तु प्रसिद्धत्वात्। पक्षे जेतुमिच्छुः दधत् जन्ने धैर्ययुक्तः भूरिश्रवसा कौरवविशेषेण केशग्रहणादिनाकृ
तावमानोपि स वृष्णिवीरः सात्यकिस्तस्य शिरश्चिच्छेद। त्वाष्ट्र सत्रिशिरसं द्रूवव्हास्मि स्तु यादवे मेषे च इति विश्व
:वृष्णिः क्षत्रियमेषयोरिति कोशान्तरं तु वृषिर्म्पा किदित्तु रणादित्तवेभि युक्तो रुक्तं।३३। पार्थ। इनस्य स्वामिनो
रावणस्य नंदनाद्रातेदत्तनकादवरजाद्भ्रातुर्महोदरनाम्नः सकाशाद्भंगं गा ८ अहारत्न प्राप्य। यशः स्वरितत्रिभुव
नोनीलो ग्निपुत्रः पुनरेव उद्भूभौ भी मो महोदरवधेन भयंकरः पराक्रमो यस्य। भंगं एकदेशक्षतिं प्राप्य शाणोप
लसंस्कारकपाषाणे घृष्टो मणिरिव। रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि चेत्यमरः। पक्षे। यशः पूर्णत्रि
भुवनोदरात्सूर्यपुत्रात्कर्णाद्भंगं प्राप्य भीमसेनः पराक्रमः शाणाघृष्ट नीलमणिरिव पुनरुद्दिदीपे। महोदरा
त्स्वकुलात् इनः सूर्यश्चाहारकोयस्य तस्मात्सूर्यकात् नाद्भंगं प्राप्य नील इव। यशाद्रत्यादि यथा स्यादित्यधिकश्चित्।
३४। अपाश्चरिवधसंसिद्धद्रामकार्ये त्वमीत्यंतं यथा स्यात् प्रथां पार्थो र्जुनश्च। सुमित्रापुत्रो लक्ष्मणः शोभ

65 नमित्रानंदजननश्च॰ रविरिवतेजस्वी शत्रोः सिंधुराजस्य समुद्राधिपतेरतिकायस्य सिंधुदेशपतेर्जयद्रथस्य च द्रुत
गतिर्यथा स्यात्तथा त्विकं प्रापामृतो रितिपाठे सिंधुराजो रावणो वृद्धक्षत्रश्च तत्सूनोरतिकायस्य जयद्रथस्य च।३५।विधु
समो पतंगशलल भावित्यमरः जन्यं युद्धं॰ तयोर्लक्ष्मणातिकाययोरर्जुनजयद्रथयोश्च।३६। गजाहरिचक्रे
णा कपिसमूहेन सुदर्शनेन च॰ पतंगे सूर्ये॰ रजनीतिरक्षसां निशिवलाधिक्यात्॰ जयद्रथमहत्वा रवेरस्तं
ग्निं प्रविक्ष्यामीत्यर्जुनेन प्रतिज्ञानात् जंत्ललणां युद्धोल्कषोनिः शंकाविर्भावश्चनेजः कालः स्वपौरुषसमयः विना
शवसरश्च विपक्षो तिकायः सैधवश्चा ३७ ततो पृथ्वीश्वरस्य रामस्य युधिष्ठिरस्य च सौदरेणाभ्रात्रा लक्ष्मणे
नार्जुनेन च॰ महदस्त्रं ब्राह्मं॰ महामंत्रवदस्त्रांतरं चासमीकं सांपरायिकमित्यमरः।३८। अमुं लक्ष्मणेनास्मा
तिकायस्य विच्छुना राहोरिव मूर्द्धि क्षपिते सति॰ अतिकायः कस्य लयं करोति न अपितु सर्वस्य॰ पक्षे अर्जुनेन मू राम०
र्द्धि छिन्ने जयद्रथकायः कस्य न भयं करोति श्रूयमाणादिदानीमस्माकमपीति दर्शयितुं वर्त्तमानापदेशः।

कबंधोऽस्वीक्रियायुक्तमपमूर्द्धकलेवरमित्यमरः ।३९। एनं तदा । अतिकायस्य सैंधवस्य च मुखेन । सीमंतः केश
वेशः सइव संजातोस्य ।४०। कृत्ते । विवलांतो विलसंतः कपयो यत्र तद्यथा स्यात्तथा । लक्ष्मणस्यास्त्रैः छिन्ना
नु समुच्छलच्छिरः कपिलक्ष्मणावानरध्वजेनजिष्णुना च । रणक्षितेरंकदेशोपातितरावणस्य मरणानुताप
कं भयं । रणभूमेः सकाशात्स्यमंतपंचकाद्बहिस्तपस्यतो जयद्रथपितुर्वृद्धक्षत्रस्यांके पातितं तस्यापि
नाशं च तेने ।४१। तदा राक्षो रामस्य युधिष्ठिरस्य च सोदरो लक्ष्मणोर्जुनश्च । तदनंतरं रणभूमेर्निर्जगाम ।
धौतां स्मुद्रांपृथ्वीं महतीं कीर्तिमुद्धृत्य । प्रलयाब्धिमध्यादूर्मिमुद्धृत्य वराह इव ।४२। निशा । राज्ञारामेणयु
धिष्ठिरेण च । चंद्रेणेव । कृतशोभमानजयमंगलसंपत् । राज्ञो रामस्य युधिष्ठिरस्य चावरजो लक्ष्मणोर्जु
नश्च कामः स्मरः काव्यप्रश्ने योजकश्च सइव रेजे ।४३। आवश्यकपदस्थेषु व्याचिख्यासा वशात्मनः । ल
क्ष्मणस्य कृतो सर्गो दशमः समपद्यत । अथ राज्ञा रावणेन दुर्योधनेन च । रजनिचराः साधारणराक्षसा

अलायुधादयश्च। धर्मराजस्य धर्मात्मनो राक्षसो रामस्य धर्मएव राजा युधिष्ठिरस्तस्य च।१। व्यूहा। व्यूहस्तु बलविन्यास
इत्यमरः। तौ रामरावणयोर्युधिष्ठिरस्य योधनयोश्च। हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयमित्यमरः। जगंति
भुवनानि।२। अवि। अविरलः सांद्रः अविरलेत्यपि पाठः। बलधूलीति च। रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्नान
द्वयो रज इत्यमरः। रवेरर्चिश्च शस्त्रं च वह्निज्वालाच हेतय इति च रणाश्रीः संप्रवृत्ता। प्रववृते। सप्रवृत्तपाठेंत
रिक्षे रजो हृद्भे संप्रवृत्ते सतीति कथंचिद्योज्यः। द्यावाभूमी तु रोदसी इत्यमरः।३। रणो। बलभिद इंद्रस्य विनेता
इंद्रजित्। रिपूणां रणो गुरौ महति प्रभावाद्दुःखेन निरीक्ष्यः महास्त्रस्य आभिचारिकहोमलब्धस्य धारास
मूहैः प्रक्रमस्य वीरान् वानरान् विगतयुयुत्सांश्चक्रे। पक्षे। गुरोर्भरद्वाजादेः प्रभावात् दुरीक्ष्यः युधि वैरिब
लानां भेत्ता। विनेता सेनापतिः द्रोणः महास्त्राणां धारानिकरैः संततिसमूहैः। विपासा हि धाराजलैः शाम्य
ति।४। भित्त्वा। अंगदो वालिसुतः केयूरं च। बलाधिनाथः सुग्रीवो धर्मपुत्रश्च। गजः कपिभेदः करी राम०

च॰ विह्वलदृवा चरतः विह्वलेक्षणावश्विपुत्रौ मैंदद्विविदौ मोहेयौ च यत्र॰ विह्वलश्चासावाहादाचारकिंषंमक्षुतरि
रूपं॰ भीमो भयंकरो वानरभेद इति कश्चित्॰ वृकोदरस्य तदुग्रमहितं॰ अनेनेंद्रजिता द्रोणेन च भग्नंपरा
जितं॰ नरदेवस्य रामस्य युधिष्ठिरस्य च सैन्यमाजौ संग्रामे न शुशुभे। स्त्रियः संयत्समित्याजिसमिद्युधः
इत्यमरः।५। तथा। तदीयेतस्य इंद्रजितः द्रोणस्य च। ब्राह्मं ब्रह्मसंबंधि॰ विस्फोरवतारो रामः कृत्स्नस्य॰ स्व
स्वपक्षाणां सहायानां च॰ स्वकीयपक्षस्येति च॰ पीडां॰ सर्वां सैन्यमादरूपां अविच्छिन्नवेधनस्यां चकृथम
पि अस्मोदानेसेहे पावस्तु प्रामादिकः अस हि ष्टित्या पन्ने! अवो देति वा पार्थ। पीडांच — मे इत्यर्थे ४।६। स्व
श। हरेर्वा योरिंद्रस्य च॰ कुमारो हनूमानर्जुनश्च॰ स्व। शक्तिरन्नं भा भिरिव श्रोषधीभिः। भिः औषधीभिरि
व स्व शक्तिरुद्भाभिश्च॰ राहो रामस्य युधिष्ठिरस्य च॰। बलं सैन्यं।७। वीरे। अपराम्भ समयं यथा स्यात्॰
उल्कारूपास्तास्तदृशाश्च दीपाः।८। तत्रा। रात्रियुद्धे। रविनंदनस्य सुग्रीवस्य कर्णस्य च अतिमात्रं यथा

67 स्मात्· नासत्यसुतौ भैंदद्विविदौ माद्रेयौ च· रक्षः कुंभो घटोत्कचश्च ।सेनम। सुग्रीवं सौ च· श्च त
शत्रून्यथास्मात्· निरस्तवैरिरक्षगणश्च· ऊर्ध्वकचास्फीतमुकुटमस्तका रक्षोघटा· रक्षः संक्षे मुकु
टमस्तकः घटोत्कचश्च· वाविसर्गलोपः।विटंकः किरीटः किरीट इत्येव क्वचित्पाठः चलपर्वताकार क
रीन्द्रपंक्तियुक्ता· कुंभेन कुंभाकर्णपुत्रेण प्रेरिता· मेघसंघातश्यामला रक्षो घटा· चलेत्यादि विशिष्ट घ
टोत्कचः श्च ते न हि मायायगजाः सृष्टाः। कुंभोतु पिंगे शिरस्युद्भूतमरणा।१०। भ्रांतां द्यावाभूमी तु रोद सी तयो
रंतरं मध्यं· गृहमित्यपि पाठः विरंचीत्यत्र सुरेंद्रेति च· तयोः सुग्रीवकुंभयोः कर्णहैडिंबयोश्च।११।जा
भ्यां। सुग्रीवकुंभाभ्यां घटोत्कचकर्णाभ्यां च· वैरिणां मरणानि निद्रा रणानीत्यपि पाठः स्वर्गगोपुराणि
त्यर्थः। त्रहमहमिका तु साभ्यात्परस्परं यो भवत्यहंकार इत्यमरः।द्यौः स्वर्लोकः।१२।चरा राक्षसेंद्रः समं०
कुंभो हैडिंबश्च· अपरे सुग्रीवादिभिः कर्णादिभिश्च।१३।तदा रविसुतेन सुग्रीवेण कर्णेन च प्र

स्फुरंती शक्तिः पराक्रमो यस्य: शरीरं निमग्नत्वा द्रुहिर्लक्ष्यमाणौकदेशा शक्तिरिंद्रदत्ता यस्मिंस्स चक्षु
रागः कृताघाताद्दिशंतितो ध्वजात यथा स्यात् कुंभः कौंभकर्णिः चूर्णितदिग्गजकुंभस्थलोहे डिंबश्च परं
स्परयुद्धांते प्रलयानिलेन पर्वतेन द्रवपातिनः ।१४। तस्मिन् कुंभे हेडिंबे च। दीर्घनिद्रां मरणं प्राप्ते सति स
स्वपक्षो रावणादिर्ये धिष्ठिरादिश्च विरोधिनां रामादीनां कर्णादीनां च वर्गः समूहः ।१५। तदात्वनंतरं। नि
कुंभः कुंभभ्राता दृत्वा रथं विरेचनद्रव्यं कोष्ठमुलमिवेति निकुंभपदावृत्त्या योज्यं निकुंभः कुंभकर्णस्य
तनय इति कौरवपक्षाविति येदितौ पक्षे कुंभजन्मा द्रोणः अवर्ष्यश्च गरूपः सलिलराशिमिवेति योज्यं ।१६
। वाणा। युधियुद्धे स्थिरस्य रामस्य धर्मराजस्य च निकुंभभयात्सैन्याः कुंभोद्भवस्य द्रोणस्य भयात्सैन्यानि
च सेनायां समवेता ये सैन्यास्ते सैनिकाश्चेत इत्यमरः ।१७। ततः कुमारस्य निकुंभस्य ध्वसनं मरणं तदु
ग्रवान्तीमवतदुरोः रावणस्य सुकरं निपातविहित्वा मारुतिवनिरोहनूमान् उघतात्मासावधानः निकुंभर

माशायपयत्नं चकार। आयुर्धृतमिति वक्तार्येकारणायोरभिदोपचारः। पक्षेऽश्वत्थामा ममतु वा नामैव द्रोणमरणोपा
यतया वधार्थं। देवानामानंदजनकः कृष्णः स्वयं तु घ्नतामाते दैकचित्तस्तस्य द्रोणस्य निधनायतत्कर्तृत्व दनुकुलं
यत्नमकरोत् क्रियार्थोपपदस्येति चतुर्थी ॥१८॥ कृता। प्रयुक्ता स्वपरंपराविघातवाग्निमपि सोढुमक्षमो तत एव कृ
— सैन्याध्यक्षो निकुंजलः शत्रुबलोपरि मायुधं विससर्ज चिक्षेप। पक्षे। शिक्षितास्त्रस्य संतानस्याश्वत्थाम्नो
विघातस्मृत्योर्वीर्णां युधिष्ठिरमुखोद्गतां मन्युशोकनेता द्रोणः वैरिसैन्यमध्ये स्थितः शास्त्रं तत्याज
॥१९॥ धृष्टाद्युम्नपराक्रमः द्रुपदपुत्रस्य पवमानो वायुर्वह्निश्च। निर्मुक्तो वैरिषु क्षिप्तः शोकात्यक्तश्च।
वैरवीरभावः पितृनिग्रहादि मूलकविरोधश्च कोऽप्यथिकां रवान्तः शत्रून् कुरुवंश्यान्धार्तराष्ट्रांश्च
एनं तिकं भं द्रोणं च। भारत पक्षे पवमान इव उभ्द्रवतीति पवमानोऽध्वः वायुवदाकस्मिकं संचार इति वा राम०
॥२०॥ सायु। पराचीपराङ्मुखा ॥२१॥ पितुः स्वरस्य शवराभ्रातुः तीव्रस्य द्रोणस्य च। तनयो वक्ष्यमाणाः

श्वत्थामा च । रोषेणामूर्छन् । क्रोधाविष्टः मकराक्षनामा । क्रोधेन । मूर्छन्नस्य तस्य सदृशो द्रुतास्त्रस्य । वाद्भिरक्षिः ।
उच्चावलत्त्वमिति निर्ययौ ॥२२॥ अमीति । तेन मकराक्षेण अश्वत्थाम्ना चत्त्वमियुक्तः क्षोणीपतेः रामस्य युधिष्ठिर
स्य च । नारायणास्त्रेण सुदर्शनेनाभिहतो राहो रथः कायइवापगतचेष्टस्तत्पक्षे ऽश्वत्थामप्रयुक्तनाराय
णास्त्रेणाभ्याहतः सुदर्शनेन राहुकायइव निश्चेष्टो बभूव ॥२३॥ तदा । मकराक्षेणाश्वत्थाम्नाच उन्मुक्ताः । क्षोणी
पालो रामो युधिष्ठिरश्च ॥२४॥ मुक्तो । पवनात्मजो हनूमान् रामस्य त्वरं ज्ञायत इत्यवरजो निकृष्टजातिर्मकराक्ष
स्य च वाचा । परस्परसंघर्षगिरा । मुक्तानि शत्रुपरिक्षिप्तानि आयुधानि येस्ते महायोधैः । संभ्रान्तो युद्धो द्यतः प
वनात्मजो हनूमान् यस्मात् रक्षोवानरसेनास्थिरीकृताः राममकराक्षयोः परस्परतर्जितगीर्भावचनश्रवणात्तो
भयपि सेनासाव ष्टंभा च बभूवेत्यर्थः ॥ पक्षे । मुक्तानि कृष्णवचनात् दूरीकृतान्यायुधानि येस्तादृशा योधवती संभ्रान्त
ःसा वेगोत्तीमसेनोयस्या सा युधिष्ठिरचमूर्नारायणास्त्रस्य प्रतिघातार्थमुपायान्तरमपश्यत ः कृष्णस्य वाचाश

१८ ६९

स्त्रस्या ज्ञातविषयिरायाज्ञी विज्ञा ।२५। श्रीकांत समरूराक्षस्या ग्वकान्तस्य पुराजां रागवृरूषं विरुंभा नवतर्तुरामंकृ क्षंत्र
त्राथ· यतेति- मकराक्षो मृतो ग्वस्त्रामाः स्वं वेय ध्याद्विरतः ।२६। प्रता। अग्रे या स्वमिव उत्तापंत मिवाग्रेया रैवं स्वं
च· रु धाति रूध्व · प्रत्यस्व्रे शामिभयच · जितोहतः पराभूतश्चारिमिकराक्षोस्य त्वामाचंयेनततं नरदेव युत्रेराम
मर्जुनंच· नुपतेस्म सिषेवे · जुषीप्रीतिसेवनयोः। कामदेवः स्मरः काव्यत्रयोजकस्य ।२७। आवश्यकपदस्लेषव्या
चिरव्यासावशात्तनः लक्ष्मणस्य कृतौ सर्गः सोयमेकादशोऽद्ययगात्॥ ॥ अथाश्वंगानां हस्त्यादीनां देशवि
शेषाणां च· गोप्तारमिंद्रजित्कर्णं च · शिजिस्योत्रित्वे रक्षराम स्यार्जुनस्य च जेतारमिति संभाव्य संभावनाविष
यं विधाय· अभिषेकादिना सत्कृत्य च · सप्रसिद्ध · दशाननोरावणः सतामशासनीयः सुयोधनस्य।१। सश्च।
समेघनाद इंद्रजित्· शक्रचापस्य छवि · इंद्रधनुः सदृशं · तद्युतियुक्तमेघसदृशगर्जितस्य · धनुर्धुन्विन्विस्फा
रयत· ज्याघ्रारसंगी कर्णोस्य · ज्याशरसंगि धनुर्धुन्वितं कर्णो राधेयस्य · भर्तुः पितर्दुर्योधनस्य च। ३ रामं०

स्य मनाहि॰ सन्नद्धं ।३। समितिः संग्राममममावाधेय आधातुं क्षितिरीकर्त्तुं योग्यो भुजप्रतापो यस्य तस्मिन् ॰ प्रदीप्तक
र्णादार्विक्रमवति च ॰ द्विषतो रावणस्य दुर्योधनस्य च ॰ चाह्नि भवेनतीलेन धनुषा घुक्तेन च ॰ नरेंद्रो रामो युधिष्ठि
रश्च ।४। रणाते उभे राक्षाः रामरावणयोर्युधिष्ठिरसुयोधनयोश्च सेने जघटाते संबभूवतुः । वनराजीतिर्ग
तेन घाविव ॰ वनसंबंधान्नघाः प्रवालयोगः प्रतिमुखं अभिमुखं ।५। आह । प्रथमं तानि युद्धविशे
षणानि ॰ सर्वे ग्या उर्वशीमुखाः कवंधो ऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः । सिंधुभिः समु
द्रैः । सिंधुः समुद्रेन धांचनदमिदेभदानयोरिति विश्वः । संबाधः संकटे भये द्वातिच ॰ संसप्तकाः संग्रा
माद् अनिवर्त्तिनः दंते श्च दंते श्च प्रहृत्येदं युद्धं प्रवृत्तं दंतादंति ॰ एवं कचेषु कचेषु गृहीत्वा ॰ कचाकचि ॰ उंत
ले श्च तले श्च प्रहृत्य ॰ तलातलि ॰ तत्र तेनेदमिति सरूपे इति बहुव्रीहिः इचूकर्मव्यतिहार इतीच् ॰ अ
न्येषामपि दृश्यत इति पूर्वपदांतस्य दीर्घः ॰ तिष्ठद्गुप्रभृतिषु चः पाठाद् अव्ययत्वं ॰ तलं चपेटः ।६। वि

70 धातीत्रधायाः रावणः· सूर्यश्च· प्रभवउत्पादकोस्यसः इन्द्रजित्कराक्षि· अरिवृंदं· रामादि· युधिष्ठिरादिच· निः
सेदं निश्चेष्टं· सस्यइन्द्रजितोनिवेशभूमिराभिचारिकस्थलं निकुंभिलाख्योवटः। उपसंध्यं संध्यासमीपे तत्रती
यासप्रमध्याश्रितम्· तीव्रस्यतेजसः प्रभवः अरिवृंदं मर्दे हादिराक्षसगणां· प्रकृष्टेस्थाने। द्वीपांतरंजंबूद्वीपा
दन्यत्· रविरिच॥ पक्षे· संध्यासमयेशिविरः निवेशः पुंसिविन्यासेशिविरोद्वाहयोरथीतिविश्वः। शत्रुगे
ऽसदं इन्द्रजित्· भगोसहस्रांशुः प्रातस्ततः सूर्यइव· विपक्षान्वांछतीतिविपक्षवांछाः अनुगाः शल्यानि
शराः सारथिश्चयस्य· रथिनक्रूतान्नितोनिर्गतेन· शल्यंशंकौशरेवंशेकदिकायांचतोमरे। शल्यश्चक
थितः स्याविल्मदनद्रुमयोरथीतिविश्वः। पक्षे· सकर्णाः प्रातः पुनर्योद्धुमायया· विरोधिनोयुधिष्ठि
रस्यवांछानुवर्ती· तत्प्रार्थितकर्णतेजोवधकारी शल्यः मद्राधिपः सारथिर्यतस्य।५।निर्य। आहवा राम०
यमिर्गच्छंनीषु· कर्णशल्य· अत्रकटुः कलहायमानराधेयमद्रेशसंबंधीवा।ऐ। अनु।चित्तानुवर्ति

ना॰ समेघनादः। पक्षेच्च थकलहानंतरं अनुकूलेन सख्येन॰ ।१०। दिग्निघातसंपातआसारः। आकंठांतिका
म्परौत्यमरः। प्रतिनिधिस्तुल्यः पृथ्वीपतेः रामस्य युधिष्ठिरस्य च॰ सइंद्रजित्कर्णाश्च ।११। कुर्वो उभौ रामेंद्रजि
तो युधिष्ठिरकर्णौ च॰ स्तुलटेतिप्रतीरे वीक्षिप्ता सेता ।१२। सवास्तइंद्रजित्॰ वाग्निः शरैश्च॰ मर्माण्यवेध्यानि
अवाच्यानि च॰ महीपते॰ रामस्य॰ क्षणेन अल्पकालेन॰ सीतायाः मायानिर्मितायाः नृपगां वधस्तद्रूपादवि
यात्॰ कृषकेस्यलांगलपद्धतिशोषणात् तृष्णिप्रतिबंध इव निर्व्यतारस्थितो कालविशेषो। सवयोः क्ष
णा इत्यमरः। सीतालांगलपद्धतिः कर्षकश्च कृषीवलः तद्विघातेऽवयाहाव अहो समाविति च। महानश्च
भितवो अहो दुरभिनिवेशो स्यस्तु पमेयविशेषणां एवं पक्षेप्यावृत्तिरिति के चित्। पक्षे॰ सकर्णः। युधिष्ठि
रस्य पीडां॰ सवाक् वाग्मी वाणैः कृतमर्मघट्टन इति कश्चित् ।१३। नेष्टो शत्रोरिंद्रजितो नेष्टे रापा
त्सीतावधरूपात्तव्यथं राममुपस्थितः। तद्विरासीताहतेति वाचात्पफल्गुनाश्च तु कुस्मापि चित्तस्य वेक्ष्का

यं लक्ष्मणः प्राप । फल्गुनः अलीकान्मायामाश्रितयानैर्धूर्ययादिनि वा । पक्षे । कर्णोक्तनिमन्त्रिना ह्युथितं युधि
ष्ठिरमुत्सृष्टितो ऽर्जुनः कर्णेन सह त्वेव प्रत्यागतस्य वृथा गांडीवमन्यस्मै देहीति तदुचाचित्रविकारं युधिष्ठिरहननो
द्योगपर्यन्तं प्राप । फल्गुनीशब्दात्तत्र जातइत्यर्णः अविष्ठाफल्गुनीत्यादिना लुक्फिलुक्तद्धितलुकीति स्त्रीप्रत्यय
निवृत्तौ फल्गुन इति । अर्जुनेः फाल्गुनोऽन्निष्ठुरित्यादौ त्वस्मादेव स्वार्थिकः प्रज्ञाघण् ॥१४॥ कृत्ता । आनानु
तापयोर्दीर्घं इति द्वन्द्वयोर्वा । तयोः दृशिरष्टम्भः अन्तः प्रतियोगि मनो विघातकं मन्युना शोकेन मूर्छनं
मोहं । कृषति दूरीकरोतीति दुःखमितिकृल्लः श्यामवर्ण इति कश्चित् । कार्ये इन्द्रजितो मायासीतावधरूपम
त्निम मावश्यकं च । तत्र हतो विभीषणोऽवानि त्योः । पक्षे । अंतर्गतपश्चात्तापयोस्तयोर्युधिष्ठिरार्जुनयोः
प्रयोगिनोर्विरोधिनोर्विभीषणो भयंकरः प्रस्तुतावश्यककार्यज्ञः कृष्णो हरिः क्रोधाक्रूयमपाचकार । अ राम०
थानुशयो दीर्घद्वेषानुतापयोरित्यमरः ॥१५॥ धृतान्वेषणा रामेण युधिष्ठिरेण च । शत्रोरिंद्रजितः कर

र्णोस्य च। कनीयानूलक्ष्मणोर्ज्जुनस्य द्विषामिंद्रजिदादीनां कर्णादीनां च उपमंनिकुंभिलायामाभिचारिकानु
ष्ठानं अभिषेणनं च। १६। अतुहनूमदारूढोध्वजीभूततत्कृतरथशोभस्य प्रतिहतोवृषध्वजइंद्रस्य सेनाया आडं
बरः समारंभो येन तं। पक्षे हिहतवृषयानिह्रुतधर्मया सेनया आडंबरोस्येति वा। वृषसेनाख्यकर्णपुत्रस्य स्व
यं निहतत्वात् दूरीकृततदाडंबरं च। एतं प्रति वेढ्ढ निकुंभिलाप्राप्तिमिंद्रजितं सुतशोकग्रस्तं कर्णं च। निका
षोनिकषापल्लः। अकर्त्तरि च कारके इति घञ् परीक्षास्थानमित्यर्थः॥ आडंबरः समारंभे गजगर्जिततूर्य
योरिति विश्वः। सैरिभचत्वरोकक्षः स्युः कक्षकाननवीरुधो॥ स्यादुपिदेपरीधानपश्चादंचलपल्लवे इति
च। १७। अत्रांतरे णो भीमासेनायस्य सविभीषणः पौलस्त्यः अत्रांतरे अस्मिन्नवसरे अमुष्य लक्ष्मणस्य
पार्श्विपश्चाद्भागं पूरयन्। दुःशासनं दुःखेन शासनीयं वैरसैन्यं यमाधीनं देयं यममात्रं करोत्। देये
त्राचेति स्मार्तिः। पक्षे। रणेभयंकरो भीमसेनोर्जुनस्य पार्श्विहे याहो लूनत्वात् दुःशासनं दुर्योधनानुजं उर

घाना।पार्ष्णिः पाश्चात्यभागेस्यात्स्यादूमूलोन्मदस्त्रियोः।सेनापृष्ठेचकुंत्यांचेति विश्वः।१९चाश्वरानंबिभीषणंभीमं
च॰श्वरातीनांरक्षसांवैरिणोदुश्शासनस्यच॰रक्तक्षरणोनरौद्रंयथास्यात्तथा।रक्तप्राघारेणोग्रकर्माणंच।१९ऐ
तद्दै।तद्रणकर्मैपराक्रमेरणेकर्मैवुःशासनात्स्वयानेनचविभीषणासंबंधिवैपादपूरणोभयंकरंच॰राजदाराणांसी
तायाद्रौपद्याश्च॰उपरोधोनिग्रहः केशांबराकर्षणोंच।२०।तदा।सुमित्रायाश्चपत्यंसौमित्रिलक्ष्मणःवाह्ना
दित्वादिंद्रजयशीलत्वेनतेनविरथीकृतः सेनांगानामीश्वरः मेघनादइंद्रजित्क्षुभ्यन्संचलन्नचुक्रोध।पक्षे
॰श्वसावंगानांदेशविशेषाणामीश्वरोमित्रिणामित्रसंपन्नेननतिघ्नार्जुनेनक्षुभ्यन्हूतसमघनिः।२१
वल।तयोर्भूगगनयोरंतरालंमर्धं॰लोकेस्वैलोकस्यदृथक्कतिरोहितुंनाशक्यत।२२।अथ।तौइंद्रजिल्ल
क्ष्मणौःशरेखड्गेचसायकइत्यमरः।स्यान्निकायःपुंजराशीइतिचा।२३।नभाश्चस्त्रियांसमरानीकर
णाइत्यमरः।२४।निर्भि।तद्रीयाःलक्ष्मणसेंद्रजितश्चशराःनाडीतुधमनिःशिरेत्यमरः।कुल्यात्याकु राम०

त्रिमासरिदितिचाकीलालं रुधिरे तोये इति मेदिनी । रूपादृशा नारदः कलिप्रियः अंतरं विशेषः उभयोर्लै र
क्ष्मणेंद्रजितोरर्जुनकर्णयोश्च · देवासुरा इति · शाश्वतिकविरोधाभावान्न समाहारः कार्योपि स्युरेषां वैरं दे
वासुरैरमृतमम्बुनिधिर्ममंथे इति भारविः ।२६। विरा अरिणा इंद्रजिता हि स्फुटं क्रूरयमदत्तबाणत्रयोक्ता स
र्पसदृशा क्रूरेति वा · हरयो वानराः वांछालिप्सा मनोरथ इत्यमरः । नृपसूनुर्लक्ष्मणः भंगं न ममर्ष · सर्पो मौ
लिरत्नापहारमिव · पक्षी अरिणा करेण अहिः अक्षाततनुत्राणविषः स्वांडवदाहे छिन्नमात्रकोनुबद्धवैरः स
र्पवाणास्तत्रयोक्ता · सहचरस्य सख्युः क्रमस्य यथास्यात्तथा सर्पेणारातिकृतशंकया व्याहताः शत्रुवांछा स घो
रयं विनमय्य तत्कंठशरसंयोगपरिहर्तुं येन सः नृपसूनुरर्जुनः आसुशीघ्रं मुकुटरत्नापहाररूपं स्वजि
घांसा भंगं मस्तकमणापहारं सर्पद्रवनसेहे । आशोः शीघ्रकारिणः कर्णाद्धंगामिति वा · अविलंबितमा
सुच · क्लीवे शीघ्राघसत्वे स्यात्त्रिष्वेषां मेघगामि यदित्यमरः ।२७। आसु । अमुना · लक्ष्मणेन कर्णेन च ·

23 धर्षेणां भतमनां स्वगणं तं प्रति प्रत्यराति आभिमुख्ये ऽव्ययीभावः। वैरिसंमुखं पेतुः। कर्णो ऽंद्रजिच्छ्रवणो राधेयस्य-उ
क्तटास्तीक्ष्णाः। २८। यस्तारणाधरिस्या संहृतसेनस्य-चक्रः कोके पुमान्पल्ली वंवडे सैन्यरथांगयोरितिमेदिनी
नेत्री रणिलेपितं स्पंदनाय अभिवारस्थलगतेः पदं स्थानं येन सः नरदेवजो लक्ष्मणशत्रो रिंद्रजितः रणकर्म
शो यं अ सोढा न किंतु सोढवानिषः न लोकेति तृन्यो गेषष्ठीनिषेधात्कर्मेति द्वितीयापक्षे ब्राह्मणशापाद्भूम्या
यस्तचक्रस्य निलीर्णाश्रंगी कृता संदनाऽयतरय व्यापत्येन तस्य शत्रोः कर्णस्य महद्धौर्येना-नरावना
रः राजपुत्रोऽर्जुनः सोढा सोढवान्। अ सोढेति पाठः प्रामादिक इत्यवोचाम। २९। ततः। प्रतीतः सादरे ख्याते
इति विश्वः। जगतींद्रुसद्मा रथस्सस्तु लक्ष्मणः। संधा प्रतिज्ञाः करणांत पर्यंतं सज्जं शरं संधायमुमोचाप
क्षे-जगति ख्यात इंद्रसूनुरर्जुनः। कर्णस्य राधेयस्यांतेनाशे सज्जं उद्यतं। ३०। उद्याक्रमेणानेधनुर्दूरस्थानेन
शोतितः तदुक्तं-अपांगे दक्षिणं मुष्टिं वामं विन्यस्य लस्तको पादमाकुंचयेद्वामं लक्ष्येनिश्चललोचन रा म०

इति क्रमबंधकमितुं सकापमतिमद्रिः अथो लक्ष्मणः उपदधंजलिनिबद्धकरपुटं यथास्यात्तथा केनचनाविन
स्तुतः शास्तुलो· कर्मणि तात शाह्निचिरार· विशिखेन स्वनेकुबेर दत्तेन यमदत्तमिंद्रदत्तेनः शरं प्रतिघ्नन् कस्य विस्मयं नानत·
नोत् अपि तु सर्वेस्यैव आज्ञा विति पाठे आजिः समावर्तनो युद्धे इत्यर्थः पक्षे· विविधविक्रमशोभितो सावर्जुनः उपततोऽ
ते नांजलिकाख्येन वाणेन· अत्र कश्चित् प्रमायोऽजलिकादर्शनाद्धारते वाणो न वाणप्रतिघाताभावान्मूल
विरोध इति मुधैव बभ्राम· तत्पक्षे न्यथैवाशयस्पदर्शितत्वात्पक्षांतरे परस्य रकार णासत्वान्मूलानुसारेणो वबा
णाक्षेपादिवर्णनस्यासंभवद्विक्तिकत्वाच्च ।३१॥ क्षिप्तो ।तिन लक्ष्मणो नार्जुनेन च जिष्णोरिंद्रस्य स खस्य च द्वेषुरिं
द्रुनितः करीस्पच· वाणाग्रेण सार्कवैरिकंठेत्यस्तापांगं यथास्यात्तथा क्षिप्तं उक्षिप्तेन भ्रुकुटिमुत्तगेन आस
मंताद्दीप्यमानयं करललटं यस्मनत् द्रष्टुणा नूनं छिन्नमुखं उच्चैस्त्पक्ष हुंकारमेवल्मूमिंल्लपयामास· नूनं·र
जि घुद्वे सुरितिच पाठे नूनं निश्चितं त्रिच्छुर्मिमिमूषयामास· द्वेषुर्मुखं मुक्तहुंकारमेवासीदित्यर्थाहृतस्या

रव्येयं। हृश्वा अंगा। अंगानां हस्त्यादीनां अंगसंबोधने वा मन्तुरिंद्रजितः अंगराजस्य कर्णोस्य चापरेषां रक्षसां कौरवाणां च
।३३। समं चमूपतिः रामो युधिष्ठिरश्च भ्रातरं लक्ष्मणमर्जुनं च उपेंद्रमिंद्र इवाल्पेनं तं दनुर्वैरोचनिर्बलः ।३४। चमू।
नीलो हनूमान् मैंद द्विविदो गदाहस्तः पुराणजनाना रक्षसामीश्वरो बिभीषणाश्च। पुरः स्फुरत्प्रसरत्कीर्तिं
पंधनं येन तं प्रलीः रामस्य तमेव पूर्णात्रयं क्षराजेन जांबवतासह प्रतस्थुः स्तुतवंतः। यातुधानः पुण्यजन
इत्यमरः। पक्षे चमूपतिर्धृष्टद्युम्नः मारुतिर्भीमः अश्विनंदनौ माद्रेयौ पुराणजनानां सत्पुरुषाणामीश्वरो
गदाधरः कृष्णः। प्रभोर्युधिष्ठिरस्य पुरः अग्रतः क्षणजेन चंद्रेण समं सदृशं स्फुरत्कीर्तिं येषां तथा धनंजय
मर्जुनमस्तुवन्। भवेत्पुण्यजनो यक्षे राक्षसे सज्जनेपि चेति विश्वः। रामायणपक्षे रामस्य पुरः जयमथ ह्रिलक्ष्म
णास्य तपि कश्चित् ।३५। रणा। अतिभूमिरुत्कर्षे काष्ठा। रामयुधिष्ठिरपक्षे हर्ष रावणाद्योधनपक्षे शोकं राम०
कारिणां तां सूर्यविकासिनां केरवाणां चंद्रविकासिनां निवेशयो णाकरषाः ।३६। तदा। जीवकरसती वकमेरु

ततः तीव्रहस्तस्य वासूनोरिंद्रजितो नक्तंचरेभ्यो राक्षसेभ्यो रणो मरणं श्रुत्वा आर्त्तो राक्षो राजा दशास्यः बहुधा अश्रुशोच
विल्लाप दुर्नयस्य सीताहरणादेः पक्षे। सूर्यपुत्रस्य कर्णस्य नक्तंचरा चौवराः स्य ग्राः धार्त्तराष्ट्रः सुयोधनः बहु
यथास्यात् कुत्स्याकि र्शा बराक र्षणादेः फलमनुभवन्॥२७॥ स्वामि। दशानेन नेन प्रेरितारजसा दिङ्मुखानि त्र्यावृ
ण्वती धीरनादाः परेषां शत्रूणां शल्यभूताः नायकाः यस्यां सेनायां वैरिसंमुखं चलिता पक्षे। स्वामिना सुयोधने
नः स्वमुखेन प्रेरिताः दशदिङ्मुखानि दश मुखेन रजसेति वा धीरनादः परः श्रेष्ठः शल्यो नायकः पति
र्यस्याः॥२८॥ ततः। चमूस्तता नोलेन धृष्टद्युम्नेन च कृत व्यूहमुखा हि। सततपरसमूहाग्रभागाः रचितव
लविन्यासविषमपुरोभागाश्च स्फुरद्दीप्तयो वानरनाथस्य सैनिकाः प्रकटप्रभावाः नरनाथस्य युधि
ष्ठिरस्य च श्रित व्यूहमुखा दशसेनापत्यपि पाठः॥२९॥ द्वा। धूलिरेव ध्वांतं द्वारशाखा शाखा द्वारं उपद्वा
रं द्वारशाखायां द्वारे परिकाष्ठे यत्क पाटमिति वा। शाखा मृगे सहाये च शाखा क्षांतरे भुजे इति विश्वः॥ अभ

नुयात्रापश्चाद्गमनं।४०।अभि।सेनानां पतिः पौलस्त्यः वैरिसंमु १ खं समापतन्नाच्छन् रराज॰ एधितास्त्राननानां।
श्रीर्यस्य पतिर्विरूपाक्षः दृति केचित् रजसापिहितो स्युमात्सूर्यो यत्र तद्व्योमगभीरगर्जितैः पूरयन्। पक्षे।मद्रराजः
शल्यः वैरिसंमुखं समापतत् अगच्छत् प्रसन्नमुखः पिहितां स्युव्योमस्वगायत्। वै कल्पिको विसर्गलोपः।४१।जनि।यरे
षां रक्षसां चमूः देवानां जनितसुखं मनुजेश्वरं रामं मनुजो रामः ईश्वरो यस्य तं सुग्रीवमिति वा॰ खराणां तीक्ष्णानां
वानरश्रेष्ठानां रक्तैर्लौहितीकृतदिक् प्रतिभटरूपेष्ववटेषु गर्त्तेषु वाराणामुखानि यस्याः उद्भटा उ या॰ ते रुद्ध
टेति वा॰ पक्षे॰ मनुजेश्वरं युधिष्ठिरं॰ देवानां जनितः शंखादिवाद्यघोषो यया॰ नरहास्तरक्तैः रंजितदिक्॰ प्र
तिभटानामवटो असनशीलो मद्रराजो मुखं प्रधानं मुखे वा यस्याः प्रतिभटानावटति वेष्टयति वटवेष्टने॰
सचासौ शल्यश्चेति वा।४२। नरे।रामः।नर ईश्वरो यस्य स सुग्रीवस्तस्मिन्निपतितैः शरैरिति वा॰ ति वा प
क्षे॰ नरेश्वरो युधिष्ठिरः।४३।रथा॰ धर्मस्य प्रभवो भूमिपतिः रामः।अत्रावसरे मूले रामयुद्धादर्शनात्।

।धर्मेयस्य प्रभवक्षिति तुरस्ववक्षे चरणमर्दे शोयस्य स सुग्रीवः विसर्गांत पाठे वि सुग्रीवएवेति च केचित्।भूमेः शल्यंराक्षसंसेत्यं संज्ञ
हारः सुग्रीववपरत्वे विरूपाक्षः शत्रुपापराक्रमेगाः पक्षे युधिष्ठिरः शक्त्या त्रस्त्व भेदेन कामसामर्थ्ययोः शक्तिरित्यमरः।
भूमेः सकाशान्मद्राजमुद्दृधार स्वर्गंप्रति घाय जघानेत्यर्थः।४४।विनंामविरूपाक्षोराक्ष सह स्फुटंः वि पक्षः ती व्रेण
तापनिनात तिनातपनास्रजेनसुग्रीवेणापातितः सन् वि तन्नाशमभार।यथाविरूपनेत्रः पक्षी श्री षेती व्रातपेन नि
पातितन्नाय विगलितपक्षोः देवस्य पर्जन्यस्य निपीडनेविनश्यति तेः सहेतिवा ःदेवः सुरे घनेराज्ञिदेवमाख्यातमिं
द्रियेपक्षे विवर्णाक्षः शस्यं ल्प युधिष्ठिरस्य तीव्रप्रतापेन निपातितः विननाशाय या सह देवकर्तृकैर्निपीडनेः
शकुनिः सौवलः सोपि तेन हत इत्यर्थः। यद्वाः शल्यवधस्य पूर्वस्लाकेउक्तत्वात् पूर्वोक्तविशेषणाः शकुनिः
सहदेवप्रहारे सतथाविनष्टः यथाविपक्षः यथावैरमकरोत्त थानाशं प्रावेत्यर्थः।४५।सुग्री।कपिराजेन
दृढवालिसुतेन शोभनग्रीवेण दृढवाहु भूषणेनच भीमेनम यंकरेण पांडवेनच युयुधानोयुध्यमानः ।२

षच सेनानीः सुग्रीव एव प्रौढः अरिकर्मैको हासउपहासो येन तं जयं त्रगृहे स्वीचकार । पक्षे । सेनापतिर्येषु धान
76 : सात्यकिः प्रौढवैरिहंता संजयं गावल्गाणिं जयाहा अग्निपुत्रो । मैंदद्विविदौ माद्रेयौ च जिष्णुना जयशीलेन न
क्षाधि येन जांबवता पद्मवनेन तुल्यं परेषां ध्वस्ताः चंद्रेणापद्मवदनमिवाऽर्जुननेति च रामायणे पूर्ववृत्तानुकी
र्तनमेतत् ।४६। विलाचनयोः रामसुयोधनयोः अस्सुयोधनं दुःखयोधनीयं दुर्योधनश्च न्याच शुक्वी पु
च्छकपयाशुरो महत्तश्च सक्रपयेति वा । व्याप्तमनस्कः । द्रौणिः शारद्वतानुसारिचित्तश्च । कृतवर्मा : आ
युक्तकवचः तन्नामाहा हृदिस्थश्च अस्सूनां प्राणानां भटो भर्ता । भटमर्नो यह्वोवटभरः परिभावणोऽनुपाल व
त्राणाः अश्व सुभटो रावणः महावीरः कृतवर्मा चापुंसि भूम्नासवः प्राणा इत्यमरः । भटा योधाश्च योद्धार इति
चायः समनिरुद्धपालं भस्त्रत्वस्मात्परिभावणमिति च ।४७। आग्नेः । धूम्रं घुम्नं तेजो यस्य तेन अग्निपुत्रे राम०
णानीलेन । धृष्टद्युम्ननाम्ना अग्निसंभवेन च । द्युम्नं वित्ते पराक्रम इति विश्वः । कामदेवेन कंदर्पेणाः कान्य

कन्नोच · वसंते तु विशिखे · वसंत्यं त्यस्मिन्निति त्यरदैणपादौ च · हृह्व वहीत्यादिना यच् । प्रोषिताः प्रवासिनो देशान्तरस्था
श्च ॥ ४८ ॥ ॥ आवश्यकपदश्लेषव्याचिख्यासावशान्ततः । लक्ष्मणस्य कृतो सर्गो भूद् दृशः समपद्यत ॥ ॥ अथास्य
मस्तु चक्रः स्फुरन् स्पंदमानो दक्षिणावाहुरस्य · नराधिपो रामो युधिष्ठिरश्च · गात्रोः पौलस्त्यस्य सुयोधनस्य चाशा
न्याशरीरमेव बलं यस्य · निर्गमं गृहाज्ज्वलाश्रयाज्ज ॥ १ ॥ निपोः । रावणस्य सुयोधनस्य च · हरिमुख्याः वानराः
कृत्स्ननायकाः पांडवाश्च · घनं बिलं होमस्थानं · विलंघनमतिक्रमं च · तदधिष्ठानं तदाश्रयं · द्वीपाः सर इव
व्यासस्य रौरूपमधिघातं द्वीपाद्वेति च लंवनं तु प्रवासे स्यात्क्रमणे लवनेपि चेति विश्वः । अधिष्ठानं चक्रपुर
प्रभावाध्यासनेष्वपि चेत्यमरः । यत्तु कश्चिद् धामसर्गस्य यथा ज्ञघानेत्यादेरत्र पाठः साधुरित्याह तदसंबद्ध
मिति स्पष्टमेव ॥ शतनः । अरातिः रावणो दुर्योधनश्च विपक्षेति वानरश्रेष्ठानां धर्षणाद्भीमादीनां गर्जि
तं चाक्रुद्धा अहीनस्य गारुडस्य लक्ष्यास्य सर्प इव क्रूररूपादिति च · पक्षे क्रूरहान्नागरवेत्यावृत्त्या योज्यं होमस्थ

त्वा ह्मासमरमस्य · अहीनं महत् युद्धमरणाद्रूपं लक्ष्यमुद्दिश्य यस्य ।३। दोर्विचार्यैः संचाराः । मंडलं समूहः । अनेकव
क्र — दृशाननत्वात् पक्षे गतिवशाद्दर्शितानेकवक्रमित्व ।४। नमामि तं रावणं सुयोधनं च दूषणं घोरामोदोषहं गाच आ
ह्वतस्पर्द्धायामाह्वतवान् स्पर्द्धायामाङ॰ इत्यात्मनेपदं कालेऽऽत्तकोपः अद्रेर्निर्भयः वृको व्याघ्र इवेति केचित् । वृक
नामा काल इवेत्यन्ये · वस्तुतस्तु · वृकोऽग्निविशेषः उदरे यस्य स काल इव · यस्य तीक्ष्णो वृको नाम जाठरो हव्यवाहनः ।
मया दत्तः स धर्मात्मा तेन चासौ वृकोदरः । अतीवान्नाद्यशील अश्वनागायुतबलो महानिति भीम हृदशीकर्ले त्वे
न भीमप्रक्रमस्य ब्रह्माणं प्रतिमात्स्ये शिववचनात् । पक्षे वृकोदरो भीम ।। क्रुद्धः काल इवः उक्तं हि · आशीवि
षो वा संक्रुद्धः सूर्यो वाग्निरिति निर्गतः । भीमोऽन्तको वा समरे गदापाणिरदृश्यतेति । वृषवाहनेन शिवेन · भग्नणांभ
तोऽज्ञामदृग्मः ।५। मुखाद्भहसस्येयामे · उत्सुकायुद्धे दिदृक्षयोत्कंठिताः । हंसालीनां शौक्ल्येन गंगासाम्यं ।६। स
र । वाराणी नदीच · नरोबलेरंहस्य · जायासीतारेवती च · अतं ब्रह्मचर्यं संयुगधाम · नात्कालिकं वीरश्रीवप राम०

देवं संग्रामस्थानं च · उपेयिवान् आसन्नागतश्च · रामो दाशरथिः बलैश्च · हरिप्रधानैः सुग्रीवादिवानरश्रे
ष्ठैः कस्मादिभिश्च।७। सञ्जातयोः रामरावणयोर्भीमसहयोधनयोश्च · समीकं रणं।८। श्राधे। घोरसंप्रदनेति रा
मस्माचीदृग्भ्रहितरथस्तस्मात् · महाद्रि ग्ग जै रहितराजेन्तवाणास्य कल्याणाः प्रष्ठोय्यगामिति · आस्तस्यासी
त् · स्यासेति पाठे अश्वसगात्यादिभिन्न्यस्य रूपञ्च सोलोडि · भूमावात।९। धूत। कंपितधनुर्लतयाः मुक्तचापल
त्वेन च · मार्गणो बाणः वरस्परच्छिद्राद्वेषणं च · मार्गितं मार्ग्येनेत्वेषे मार्गणो याचके शरे इति विश्वः
१०। मुक्ता। उभयोः रामरावणयोर्भीमहुर्योधनयोश्च · आयुधानां शरासनगदयोश्च। ११। मभो। दृच्छ
दिघाते भङ्कृद्वयोः। सुदक्षत्वाद् श्रांतमनोरतं रणकर्मे · रणकर्मस्तुनैपुणाद् श्रांतं श्रमाभावो वा · न
पुंसके भावे क्तेः। उभयोः रामरावणयोर्भीमसहयोधनयोश्च। १२। तथा। शक्रभवनं स्वर्द्दिवंनभ इति त्रि
कांडशेषादिविमोकोयेषां · एकतरोन्यतरो रामो रावणो वा · एवं पक्षेपि। १३। मध्ये। घट्टः संघट्टः। श्र

२८ श्रमि ज्वालाजयश्रीरिवदृश्यते ॥१४॥ पौष्पी चक्षुःष्याकाद्यंत्यद्रितिभीतक्रान्तिः ॥१५॥ दिदिग्नि। नागाग्रे जलहा
सिनः । वीचीः क्षिपतीति लन्निपः । छद इति पाठे बहुव्रीहिः ॥१६॥ विलोलजगाम्या रासत्या लकोदशरथो वा
सुश्च तद्दद्वंन्न पात्मजं रामं भीमं च कोपि शुकोपने पुतामसे पुराक्षसेषु चिरंतनश्चिरजीवी मुनिस्तन्ना
न्तिदोषस्पृशो विभीषणः को विश्व चिंत्यमहिमा चिरंतनो मुनिः कुम्भस्य तिमृतं तनिगदं यथा स्मात्तथा
श्रमे समायमीमायच उपायनाभिगनाम तशो यं कृत्स्नघातं च नवेरयद्वि हितं चकार इह कोपि मुनिर्व
द्या स्वो परिश्रा सा न तिनरिदो वेत्या घसंभवह किं कर्मिलिस्य समेवा करदृशं ॥१७॥ ववामी मोभयंकरो
वृको हरस्य महद्दायुधमहतीयुधंच ... समंवापि पक्षवीरं रावणं सुयोधनं च मर्मशिना
मौकुर्वोश्च ॥ पुराणम ॥ पाकस्तु वालिनमिव निशाचरेश्वरं राक्षसपतिं जघान पक्षौ यथा रा०म०
सतावधिकश्री धानां शेषाद्रेक रामो वालिनं रावणेन च ॥१८॥ तन्न यथागतमानसो गतप्राणः

छिन्नस्तवनिनशोभः। गुरुर्महांतं भंगमाप्य भूमौ पपात। पक्षे। गुरुर्द्वेगतमानसः दृसः सः १८ गुरुद्वैः अस्तंतं दुःखयोधनीय। १८ सुयो
धनो दुर्योधनः छिन्नदशा विवशा विस्या मुखश्रीर्यस्य। ऊर्वोर्भंगं प्राप्य जानुभ्यां भूमिं जगाम। सुवेतिः रक्षसां देसानां च
मूर्त्तीभिमानइव। सोपि तैर्देवोच्छिन्न इति भावः। १९। अंते। तस्य रावणस्य सुयोधनस्य च देहः। परिष्कृपो विभूषणमित्य
मरः। २०। विसा। अनिमिषादेवाः सूताः बंदिनः भूत्ता इति पाठे देवयोनिविशेषाः दिश एव पुरंध्र्यः। रामा वामा वामनेत्रा पुरं
ध्री नारी भानुभीमिनी कामिनी चेतिहलायुधः। २१। तौ त्वा पिवनात्मजेन हनूमता भीमेन च। अरी रावणो दुर्योधनश्च।
रात्रपत्नी सीता कृष्णा च भर्तृमुखावलोकरूपं महोत्सवं द्वयेष प्रापच। २२। महाभयंकरबलेन रामेण भीमस्य बलेन
च। पत्नी सीता कृष्णा च। २३। पक्षः। रामस्य भीमस्य च। सति। कृतकल्पा। निबद्धवेणीश्च। अमल्यः संतापो यस्याः तस्माद
ग्नेः प्रविश्य निर्गता। तीव्रसंतापाग्नेर्मुक्ता च। वाजवधूः सीता कृष्णा च। २४। राज्ये लंकाधिपत्ये नियुक्ते न विभीषणेनानु
गतः हरिः सुग्रीवः प्रणीतानायकोस्य तेन बलेन सैन्येन च। नराधिपो रामः स्वां नगरीमयोध्यां प्रतस्थे विमानराजस्य पुष्प

कस्यप्रभुत्वात्स्वामित्वं प्राप्तः। पक्षे तत्तद्राजरूपेण भयंकरेण कृष्णाज्ञावर्त्तिना तु यातो विज्ञाताभिमानानां विशिष्टसन्मानभा
जां वा राज्ञां स्वाम्यं प्राप्तो युधिष्ठिर इंद्रप्रस्थं प्रतस्थे। रथास्य मनु मुत प्रीतिस्तत्सहितः भर्त्तरि रामे महतीं भक्तिं वहन्· रामस्य
कृपां अनुगच्छतीति तदनुरूपस्थितिः कृतवर्मणः कवचस्य नोदनं मोचनं येन सः। गुरोर्महतो वंशस्य पुलस्त्यकुलस्य वृ।
द्धि जनकः विभीषणः क्षपाचरो राक्षसः सत्तं राजश्रेष्ठं राममनुजगाम। पक्षे· गुरोर्द्रोणस्य वंशवर्द्धनोश्वत्थामा· भर्त्तरि दु
र्योधने भक्तिं समुद्वहन् कृपो मातुलोनुगामी यस्य· कृतवर्मणो हार्द्दिक्यस्य नोदनः प्रेरकः क्षपायां रात्रौ सौप्तिकवधा
र्थं चरतीति सः विभीषणः क्रूरकर्मकरत्वाद्भयंकरः तं राजबलं राज्ञां बलभृतं युधिष्ठिरमन्वगमत्। २६। सकुं। कुंभजस्याग राम०
स्त्यस्याशा दक्षिणा दिक् तत्संभवः प्रभंजनो दाक्षिणात्यो वायुः सकुलस्य समानकुलस्य हनूमतः आनुकूल्येन शैवेः जा
लेः सहशरं नीरे शरः कांडे इति विश्वः शैवेनेरिति पाठे मंदं· पताकिनीं सेनां आयानन्आगच्छन्· तां वानरसेनां अवर्द्धयत्·
पूरयामास अश्रमापनयनेनोद्दहर्षयदिति वा पक्षे· सुप्रसिद्धः कुंभजस्य द्रोणस्य आशासंभवोश्वत्थामा· कुलस्यस

ज्ञातीयसमुदायस्यरूपादेरानुकूल्येनानुमतेमपताकिनीः धृष्टद्युम्नादिसेनांश्चागच्छन्ततां शरैर्वीराः शनैरितिपाठे
मंदंमंदमागच्छन्नश्चवर्द्धयतचिच्छेदावर्द्धच्छेदनपूरणयोः चुरादिः किंविन्तुशकुनस्यपक्षिणः शुभस्यचकस्यमानुकू
ल्येनसहशनैः पताकिनीत्रवयंतीयुक्तांरामसेनांसौभाग्यसंपन्नांसीतांवाश्चागच्छन्दाक्षिणात्योवायुस्तांसेनांसीतां
वा उश्चवर्द्धयतवृद्धिमगमयत्तापक्षेशकुनस्यकाकोपसंहर्तुरुलूकस्यानुकूल्येनतत्त्वदर्शितयुक्त्याद्रोणोधृष्टद्यु
म्नादिसेनामवधीतापताकावैजयंत्यांचसौभाग्येपिध्वजेपिचेतिकोशइत्याहुः कुलंजनपदेगोत्रेसजातीयगणेपिच
कुंभजोवृक्षभेदेस्याद्गास्यद्रोणायोरपीतिविश्वः । २७ । अभ्यासमीपे· सेनापतिः प्रहस्तादिर्धृष्टद्युम्नश्च· कुणपः शवःभी
ष्माभयंकरश्चरयोभीष्मादिः शिखंडीच· कुमाराश्चतिकायादयोद्रोणपदयाश्च· वेतालाः पिशाचभेदाः फेरवः शृगालाः
भेरुंडंभीषणांतुंडंमुखंरुंडइतिपाठेरुंडोमुंडइतिहारावली· रुंडः कवंधइतिमालतीटिप्पणेसर्वरक्षितइतिकश्चित्त
भेरुंडोदेवताभेदेयक्षिणपक्षिकयोः स्त्रियांभयानकेवाच्यलिंगइतिमेदिनी· तथाचउपरिपतच्छृगालभयानककवंध· वधूः

सीता कृष्णा च: आर्य: श्वशुरो द्रोणश्च तत्पुत्रस्य रामस्याश्वत्थामश्च पुत्रद्वयं गंगोत्तुनशशाक· कामरूपात्पुत्रा दिशो
काश्च।२८। कृता आरे: रावणास्येन्द्रो रोमश्च· कृतं आगो ऽपराध: दारहरणं सौप्तिक पुत्रादिवधश्च येन लस्य· समग्रणां चूडा
मणि सहितानां मौली नाम स्तकानां छेदनात्त्वत्त्य शिरोरत्नयहाच्च· कृतवैरनिर्यातनं विजयं विशिष्टत्रय युक्त मर्जुनं
च स्तुवंत: सुग्रीवाद्या: कृष्णाद्याश्च· सलक्ष्मणं रामं सयुधिष्ठिरादिमर्जुनं सभीमादिं युधिष्ठिरमेव वानुज ग्मुः।२९। ए
वं त्वा पदमिवारीं वंत मिवापदं च· वादृवार्थे· रामो युधिष्ठिरश्च· भरत प्रधानं केकयी सुतादिं कौशल्यं च ग्रराष्ट्र
धारकं पुरस्तादविके यं च।३०। शिखा मयूराणां। तं रामं युधिष्ठिरं च।३१। चिरात्तयो: राम युधिष्ठिरयोर्दर्शनेन।३२। श्री खं।
पत्यो रामे युधिष्ठिरे च।३३। करा अवनिपाल: रामो युधिष्ठिरश्च।३४। नाथे· पुरंध्री सीता कृष्णा च:।३५। तदा तस्या: सीताया
द्रौपद्याश्च।३६। वये। विशेषेण लक्ष्यमाणा अनुभवायत्र· सर्वेषां प्रत्येकानुभवात्तुल्यता।३७। शरी।। एतत्· समर्तृक राम०
स्नुषादर्शनं· स्नुषा सीता कृष्णा च· जननीं कौसल्यां कुंती च· नरेंद्रो रामो युधिष्ठिरश्च।३८। आयो। त्राता लक्ष्मणो भीमास्य

श्वांतरामं युधिष्ठिरं च माता कौसल्या कुंती चा ३९ मंमो ककिगतो· बाहुलकादतच्· गौरादिः ङ्यापोरिति ह्रस्वः। प्रसाधनी
कंकतिकेत्यमरः· कंकतेतियुक्तः पाठः· कंकतं तु प्रसाधनमिति क्लीबकांडे कंकती तु प्रसाधनीति स्त्रीकांडे च सा ममाला। ४०
। अथा। मौलेः स्नमाल्यादिभिः ४१ लंचा। रामं युधिष्ठिरं च। दयितया· सीतया कृष्णया च· भद्रपीठमरण्यादि घटितं राजा
सनं· नृपासनं यत्तु भद्रासनमित्यमरः ४२ जलो। विष्वक्सर्वतः ४३ सघो। मंक्षुशीघ्रं। पर्यस्तार तत्र आछादितवती। ४४।
प्रासाम्रूछनमुपचर्य गछन्। मूर्छा मोहसमुच्छ्राययोः। शिवतातिः शिवंकरः। आस्त आसीत्· आसेति पाठे अस ग
त्यादिषु इत्येतस्य लिटि रूपं अस्तेर्भूभावेनापहारात्। ४५। तं ता रामं युधिष्ठिरं च निरराजयन्। नीराजयंति स्म। ४६ द्वीप
शाक्षितिभर्तुः रामस्य युधिष्ठिरस्य चा ४७ विमान रामो युधिष्ठिरश्च ४८ पुरा। मूलकमेतु कार्मणां· सिंहाकारमासनं·
सिंहासनं तु तत्तु हैममित्यमरः ४९ मणि। प्रतिफुल्ला प्रतिबिंबिता। ५० लीला। चामराण्येव मराला हंसाः ५१ अत्र तु कि
याविशेषणं। आनकेः प्रथमं निवेदितैः कुशीलवैः ५२ रात ते। वितते घ्रा नद्धादिषु। ततं वीणादिकं वाद्यमानद्धं मुरजादिकं। वंश्यादिकं

तु सुषिरं कांस्यतालादिकं घनमित्यमरः लयः साम्यमिति च ॥५६॥ सको नर्त्तकीलासिके समे ॥५७॥ सचांचंद्रलेखहे
सपक्षपम्मकोषस्तु कुतुंडुस्त्वंगहारविशेषाः ॥ तत्संबंधिनस्तु प्रसिद्धाः ॥५८॥ सपूद्रव्यं वित्तं स्वापतेयमृक्थं रिक्थं धनं
वस्वित्यमरः ॥५९॥ सस्थूला स्थूलवेदानस्थूललक्षदानशीलौ वहुप्रदः वनीपको याचनक इत्यमरः ॥ अधिनोत्प्रीणयामा
साधिविप्रीणानो अधिश्रीः पूर्णसंपत् ॥६०॥ रमा ॥ सा रमा लक्ष्मीस्तत्र रामं युधिष्ठिरं च आरप्राया तमिति सामर्थ्याल्लभ्य
ते मारमारं स्त्रेष्टकामं आनतानम्रा मारस्य मारस्य मानं तनोतीति वा तनोते ईः ननता नम्राः किंतु समुद्भिन्नाः नम्यते इति न
मा रतोनुरक्त आगमो यस्याः मांशोभां गता प्राप्ताः रसेन मात्सर्यादिना अनतम मनतम्रमाननं मुखं मानसं च यस्याः ॥ सर्वतो
भद्रः ॥ तदिष्टं सर्वतोभद्रं प्रमयां यदि सर्वत इति कंठाभरणात ॥६१॥ रम्या ॥ सुंदरीः आकल्पं विलसनशीलानि यमापिष्ट रम०
तमंडना स्थितिर्मर्यादा तद्वती अभीष्टलोकांतरास्तु खो ह्मुर्काः ॥ रमिता नुजेनोपलक्षितं रामं दाशरथिं रमंते स्मेति यु
धिष्ठिरं ष्ठिरं क्षितिपतेर्दशरथस्य पांडोश्च लक्ष्मीराश्रयते स्म ॥ चक्रबंधः ॥ पुरः पुणोलेखसादानत्रत्रीन्षडरीकृता ता तु

पंतुन्नमयेन्नेमौनामां कश्च कःसं। विधिरिति कंदाभरणात्तात्म्रत्रोकः कविराजकाव्यमिति।६२।श्रुतातीर्थभूताद्गुरुरूपात्
कुंभभुवोः वाल्मीकेः सर्वज्ञात् कुंभभुवो गोगायाः कवे र्नीविभ्राश्च स्वपुरं किष्किंधा द्वारवतीच राजा रामो युधिष्ठिरश्च ह
रीणां सुग्रीवादीनां कृष्णस्य च।६३। श्रिया। स रामो युधिष्ठिरश्च भरतप्रत्यर्पितया भरतकुलागतया च श्रिया सेवितः अनु
जालक्ष्मणाख्यो भीमाख्यश्चाकामदेवः स्मरः लक्ष्मणोस्य काव्यप्रयोजकश्च सभाः सशोभः रस्यायल्पाश्रीसा च सानुमहः
राजपक्षे सरस्वती सहितयेति वा लक्ष्या।६४। आवश्यकपरश्लेष व्याविख्यासावशात्मनः। लक्ष्मणस्य कृतौ सर्गी इत्थया
यासीत्त्रयोदशः॥ ॥आवश्यकश्लेषषष्टशेयेक विवक्षया। श्रीलक्ष्मणो राघवपांडवीयव्याचष्ट विस्पष्टगलीरभावा।१। उन्न
मश्लोकपादाञ्जरजो निर्मृष्टचेतसः। दत्तसूरिसुतस्यैषा कृतिरस्तु सतां मुदे।२। प्रमादतिमिरच्छन्नश्लेषाशयविशोधिनी। उपादद्धमपाकसम
स्तं संसारचंद्रिका।३। इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणपरमहंसपरिव्राजकाचार्यश्रीमदुत्तमश्लोकतीर्थम
हामुनिकृपाकटाक्षैकवीक्षितब्रह्मज्ञानिवंशावतंसश्रीमद्दत्तसूरिसुतलक्ष्मणपंडितविरचिता राघवपांडवीयटीकासा
रचंद्रिका समाप्ता॥ ॥ॐ तत्सद्ब्रह्मार्पणमस्तु॥ ॥श्रीगुरुभ्यो नमः॥ श्रीसम्वत् १८ ३३॥ शक १६९८ श्री राम ४

८२

राघवपांडवीयटीका

१८००

२४